स्वामीसमर्थसेवेकरी

# श्री कालभैरवाष्टक स्तोत्र

ॐ देवराजसेव्यमानपावनांघ्रिं पंकजं ।
व्यालयज्ञ सूत्रमिन्दुशेखरं कृपाकरम् ॥
नारदादियोगीवृन्द वन्दितं दिगंबरम् ।
काशिकापुराधिनाथ कालभैरवं भजे ॥**1**॥

भानुकोटी भास्वरं भवाब्धितारकं परं ।
नीलकंठमिप्सितार्थदायकं त्रिलोचनम् ॥
कालकालमम्बुजाक्षमक्षशूलमक्षरं ।
काशिकापुराधिनाथ कालभैरवं भजे ॥**2**॥

शूलटंकपाशदण्डपाणिमादिकारणं ।
श्यामकायमादिदेवमक्षरं निरामयम् ॥
भीमविक्रमं प्रभुं विचित्रताण्डवप्रियं ।
काशिकापुराधिनाथ कालभैरवं भजे ॥**3**॥

भुक्तिमुक्तिदायकं प्रशस्तचारुविग्रहं ।
भक्तवत्सलं स्थितं समस्तलोकविग्रहम् ॥

विनिक्वणन्मनोज्ञहेमकिंकिणीलसत्कटिं ।
काशिकापुराधिनाथ कालभैरवं भजे ॥**4**॥

धर्मसेतुपालकं अधर्ममार्गनाशकं ।
कर्मपाशमोचकं सुशर्मदायकं विभुम् ॥
स्वर्णवर्णशेषपाशशोभितांगमण्डलं ।
काशिकापुराधिनाथ कालभैरवं भजे ॥**5**॥

रत्नपादुकाप्रभाभिरामपादयुग्मकं ।
नित्यमद्वितीयमिष्टदैवतं निरंजनम् ॥
मृत्युदर्पनाशनं करालदंष्ट्रमोक्षणं ।
काशिकापुराधिनाथ कालभैरवं भजे ॥**6**॥

अट्टहासभिन्नपद्मजाण्डकोशसंततिं ।
दृष्टीपातनष्टपापजालमुग्नशासनम् ॥
अष्टसिद्धिदायकं कपालमालिकन्धरं ।
काशिकापुराधिनाथ कालभैरवं भजे ॥**7**॥

भूतसंघनायकं विशालकिर्तिदायकं ।
काशिकावासलोकपुण्यपापशोधकं विभुम्॥

नीतिमार्गकोविदं पुरातनं जगत्पतिं ।
काशिकापुराधिनाथ कालभैरवं भजे ॥8॥

कालभैरवाष्टकं पठन्ति ये मनोहरं ।
ज्ञानमुक्तिसाधनं विचित्रपुण्यवर्धनं ॥
शोकमोहदैन्यलोभ कोपतापनाशनं ।
ते प्रयान्ति कालभैरवांघ्रिसंन्निधिं ध्रुवम् ॥9॥

इति श्रीमत् शंकराचार्यविरचितं कालभैरवाष्टकं संपूर्णम् ॥